# संस्कृत-वार्ता:

दिनाङ्क : 13/02/2026 सायम् - 06:20

## मुख्यवार्ता:

- आयव्ययसंकल्पना-सत्रस्य प्रथमः भागः समाप्तः; संसदः उभयसदने सप्ताहत्रयानन्तरं अग्रिममासस्य नव दिनाङ्के द्वितीय-चरणाय पुनः उपस्थास्यतः ।
- प्रधानमन्त्री नरेन्द्रमोदी नवदेहल्यां प्रधानमन्त्री-कार्यालयेन सह अन्यद्वयोः सार्वकारिकभवनयोः उद्घाटनम् सेवा-तीर्थत्वेन अकरोत्।
- संसदीयनिर्वाचने प्रचण्डविजयानन्तरं बाङ्ग्लादेश-नेष्नलिस्ट-पार्टीति दलम् अग्रिमसर्वकारस्य निर्माणाय सज्जमस्ति, प्रधानमन्त्री मोदी च निर्णायकविजयाय बी. एन. पीति दलप्रमुखं तारिक रहमानं अभिनन्दयन् उक्तवान् यत् भारतं लोकतान्त्रिकस्य बाङ्ग्लादेशस्य समर्थनाय प्रतिबद्धमस्तीति।
- विश्व-रेडियो-दिवसस्य स्मरणार्थं आकाशवाणी-रायपुरं एकं सम्मेलनम् आयोजयति, यत्र उदयोन्मुखप्रौद्योगिकीनां मध्ये माध्यमस्य विकसिता भूमिका अन्वेषिता भवति।
- चेन्नै-नगरस्य एम्. ए. चिदम्बरम्-क्रीडाङ्गणे नीदलैण्ड्-देशेन सह यू . एस्. ए.-देशः संघर्षाय कटिबद्धोऽस्ति।

## लोकसभा-राज्यसभा प्रक्रिया

आयव्ययक-सत्रस्य प्रथमः भागः अद्य समाप्तः। संसदः उभयसदने सप्ताहत्रयानन्तरं अग्रिममासस्य नव- दिनाङ्के द्वितीयचरणाय पुनः समागमिष्यतः। सत्रस्य प्रथमः भागः गतमासस्य अष्टाविंशे दिनाङ्के राष्ट्रपतिवर्यायाः अभिभाषणेन आरब्धः आसीत्। द्वितीयश्च भागः एप्रिल-मासस्य द्वि- दिनाङ्कपर्यन्तं प्रवर्तते। लोकसभायां, अद्य सत्रस्य प्रथमस्य चरणस्य अन्तिमे दिने, यदा मध्याह्ने द्वादश वादने स्थगनानन्तरं सभा सम्मिलिता, तदा बहवः मन्त्रिणः स्वमन्त्रालयसम्बद्धपत्राणि पट्टिकायां स्थापितवन्तः। ततः परं, पीठासीन-अधिकारिपदासीना सन्ध्या-रे वर्या अग्रिममासे पुनः सभां कर्तुं सभां स्थगितवती। तत्पूर्वं, पीठासीन-अधिकारिणा प्रश्नोत्तरकालः स्वीकृतः, यस्मिन् केन्द्रीयस्वास्थ्यमन्त्री जे. पी. नड्डाः कोडीन-आधारित-कफ-सिरप इत्यस्य सेवनेन सम्बद्ध-मृत्योः विषये प्रश्नानाम् उत्तरम् अददात्। श्रीनड्डाः अवदत् यत् देशे कोडीन-आधारितस्य कफ-सिरप इत्यस्य सेवनेन न कस्यापि मृत्युः अभवदिति। परन्तु, विपक्षस्य कोलाहलात् श्रीनड्डाः स्वप्रतिक्रियां समापयितुं असमर्थः अभवत्। काङ्ग्रेस-पक्षस्य, टी. एम. सी.-

पक्षस्य, डी. एम. के.-पक्षस्य च सदस्याः मध्यसभाम् आगत्य कोलाहल-कर्तुम् आरब्धवन्तः। यदा विरोधः अन्ववर्तत तदा सभा मध्याह्ने द्वादश-वादनपर्यन्ताय स्थगिता। राज्यसभायां अद्य आयव्ययक-सत्रस्य प्रथम-चरणस्य अन्तिमे दिने, शून्य-प्रहरस्य प्रश्नोत्तरकालस्य च कार्याचरणं सुगमतया सम्पन्नम् अभवत्। उच्चसभायां प्रश्नोत्तरकाले अनुपूरकाणां प्रश्नानाम् उत्तरं दत्त्वा कृषि-कृषकाणां कल्याण-मन्त्री शिवराजसिंह-चौहानः अवदत् यत् प्रधानमन्त्रिणः नरेन्द्रमोदीवर्यस्य नेतृत्वे देशे सर्वत्र कृषकाणां प्रत्येकं समस्यां समापयितुं निरन्तरं प्रयत्नाः क्रियमाणाः सन्तीति। सः अवदत् यत्, कृषकाणाम् उत्पादनानां सुरक्षितसञ्चयार्थं सर्वकारेण कृषि-मूलसंरचना-कोषः निर्मितः अस्तीति। पश्चात् उच्चसदनम् अग्रिममासे पुनः मिलितुं विरामाय स्थगितम्।

<u>प्रधानमंत्री-सेवा तीर्थ-सङ्कुल</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य दिल्लीनगरे सेवा तीर्थ-सङ्कुलस्य उद्घाटनम् अकरोत्, यत्र तस्य नूतनः कार्यालयः भविष्यति। सेवातीर्थं प्रति स्थानान्तरणानन्तरं प्रथमैव निर्णये प्रधानमन्त्रिणा नरेन्द्रमोदिना पी. एम. राहत इति योजना, लक्षपति-दीदी द्विगुणी कृत्य, कृषि-अवसंरचना-निधिरपि द्विगुणितोऽस्ति, स्टार्ट्-अप्-इण्डिया इत्यस्मै दश-सहस्रकोटिरूप्यकाणां निधिश्च अनुमोदितः। श्रीमोदी कृषकाणां, महिलानां, यूनां, दुर्बलनागरिकाणाञ्च कृते महत्त्वपूर्णेषु निर्णयेषु हस्ताक्षरं कृतवान्।

<u>बी. एन. पी./ प्रधानमन्त्री/ बाङ्ग्लादेश</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य बाङ्ग्लादेश-राष्ट्रवादी-दलस्य अध्यक्षेण तारिक-रहमानेन सह वार्तालापं कृत्वा बाङ्ग्लादेश-निर्वाचने उल्लेखनीयाय विजयाय अभिनन्दनं कृतवान्। सामाजिकान्तर्जालीय-सन्देशे श्रीमोदी अवदत् यत् बाङ्ग्लादेशस्य जनानां आकांक्षाः पूरयितुं भारतदेशः श्री-रहमानस्य प्रयत्नाय समर्थनञ्च प्रेषितवानिति। ऐतिहासिक-सांस्कृतिक-सम्बन्धयोः निकट-प्रतिवेशिरूपेण, उभयोः राष्ट्रयोः जनानां शान्त्यै, प्रगत्यै, समृद्ध्यै च भारतस्य प्रतिबद्धता पुनः दृढीक्रियते इति मोदी वर्यः अवदत्। अवधेयं यत् अध्यक्षस्य तारिक-रहमानेत्यस्य नेतृत्वे बी. एन. पी. इति बाङ्ग्लादेश-नेशनलिस्ट-पार्टीति दलेन त्रयोदशे सामान्यनिर्वाचने बहुमतं अतिक्रम्य देशे अग्रिमं प्रशासनं निर्मातुं सज्जताधिकारः प्राप्तोऽस्ति।

किरेन रिजिजु-मोशन्

संसदीयकार्यमन्त्री किरेनरिजिजूः अवदत् यत् लोकसभायां विपक्षनेतारं राहुलगान्धीं विरुध्य भाजपसदस्येन निशिकान्तदुबे इत्यनेन प्रस्तुतस्य मूलप्रस्तावस्य विषये अग्रिम-निर्णयः अध्यक्षेण सह परामर्शानन्तरं भविष्यतीति। प्रसारमाध्यमेन सह वार्तालापं कुर्वन् श्रीरिजिजुः अवदत् यत्, प्रस्तावः विशेषाधिकारसमित्यै, नीतिसमित्यै वा विचारणीयः भविष्यतीति।

राष्ट्रपति-सशक्तभारतम्

राष्ट्रपतिः द्रौपदी मुर्मुः अद्य अवदत् यत् विकसितराष्ट्रस्य निर्माणे न केवलं राजनैतिकस्थिरतायाः सुदृढायाः अर्थव्यवस्थायाः च आवश्यकता भवति, सहैव हि स्वस्थानां, शिक्षितानाञ्च उत्तरदायिनां नागरिकाणामपि आवश्यकता भवति। राष्ट्रपतिः नवदेहल्यां सशक्तभारताय कर्मयोगस्य विषये राष्ट्रव्याप्याभियानम् संबोधयन्ती आसीत्। सा नागरिकान् निष्कपटतया परिणामान् त्यक्त्वा समर्पणेन च कार्ये ध्यानं दातुं उद्बुद्धवती।

बाइट-राष्ट्रपतिः-30 से.

गिरिराज-वाणिज्यव्यवहार

वस्त्रोद्योग-मन्त्री गिरिराज सिङ्घः भारत-अमेरिकादेशयोर्मध्ये वाणिज्यव्यवहारेति विषये जनेषु भ्रमोत्पादनाय विपक्षीय-दलानां निन्दाम् अकरोत्। संसदभवनात् बहिः वार्ताकारैः सह वार्तालापं कुर्वन्, श्रीसिङ्घ्-वर्यः अवदत् यत्, केन्द्रीयकृषिमन्त्री शिवराजसिङ्घ् चौहानः, वाणिज्यमन्त्री पीयूष-गोयलश्च स्पष्टम् अकुरुताम् यत् कृषकाणां हितं न बाधयिष्यते इति।

आकाशवाणी-वार्ताहरेण सह विशेषरूपेण वार्तालापं कुर्वन्, नेशनल-कमोडिटि-एण्ड-डेरिवेटिव्स-एक्चेञ्ज्-लिमिटेड् इत्यस्य प्रबन्धनिदेशकः डा. अरुण् रास्ते इत्येषः अवदत् यत्, लघु-कृषकाणां हितस्य रक्षणार्थं गोधूमः, तण्डुलः, दुग्धं, कुक्कुटपालनम् इत्यादीनि कृषि-वस्तूनि अनुबन्धात् बहिष्कृतानि सन्तीति।

आकाशवाण्याः रायपुरकेन्द्रम्

आकाशवाण्याः रायपुरस्थेन केन्द्रेण छत्तीसगढ-राज्ये अद्य विश्व-रेडियो-दिवसस्य उपलक्ष्ये सम्मेलनम् आयोजितम्, यत्र उदयोन्मुख-प्रौद्योगिकीनां मध्ये आकाशवाण्याः माध्यमरूपेण विकसिता भूमिका अन्वेषिता। यूनेस्को-संस्थायाः सहयोगेन रायपुरनगरे अयं विशिष्टः कार्यक्रमः आयोजितः आसीत्। छत्तीसगढस्य मुख्यमन्त्री विष्णुदेव साईं

मुख्यातिथिरूपेण अस्मिन् कार्यक्रमे भागम् अगृह्णात्। अस्मिन् कार्यक्रमे आकाशवाण्याः महानिदेशकः राजीव जैनः, यूनेस्को-संस्थायाः सम्प्रेषण-सूचना-क्षेत्रोपदेशकः हज्जाज माले इत्येषः, नैके प्रतिनिधयः, पद्मश्रीपुरस्कारेण पुरस्कृताः जनाः, विविधक्षेत्राणां विशेषज्ञाः च भागं भजितवन्तः। उपराष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः, प्रधानमन्त्री नरेन्द्रमोदी च अस्मिन् अवसरे शुभाशयाः प्रेषितवन्तौ।

महिला-एशिया-कप्-रायज़िङ्ग-स्टार्स

थाईलैण्ड-देशस्य बैङ्काक-नगरे अद्य आरब्धायां षड्विंशत्यधिक-द्विसहस्र-तम-वर्षस्य महिला-एशिया-कप्-रायज़िङ्ग-स्टार्स इत्येतस्यां हॉकी- स्पर्धायां भारत-ए इति दलेन गतविजेतृ-रूपेण स्वस्य अभियानम् समारब्धम्।

आई.सी.सी-पुरुष-टी-20/ विश्वचषक

आई.सी.सी-पुरुष-टी-20- इति क्रिकेट-विश्वचषक-क्रीडायां जिम्बाब्वे-देशः अद्य अपराह्णे कोलम्बो-नगरे समूह-बी-क्रीडायां आस्ट्रेलिया-देशं त्रिविंशति-धावानंकैः पराजयत। अत्रान्तरे दिल्लीनगरे केनडा-संयुक्त-अरब-अमिरात-देशयोर्मध्ये समूह-डी-क्रीडायाः आयोजनं प्रचलति। चेन्नई-नगरस्य एम. ए. चिदम्बरम्-क्रीडाङ्गणे अमेरिका-देशः नीदरलैण्ड-देशं सम्मुखीकरिष्यति, क्रीडा च सायं सप्त वादने आरप्स्यते।

।। इति वार्ता: ।।